दिनाङ्क :- 18.08.2024 सायम् - 06:20

**इयम् आकाशवाणी**
**सम्प्रति वार्ता: श्रूयन्ताम्**
**दिनाङ्क :- 18.08.2024 सायम् - 06:20**

**आदौ-मुख्यवार्ता:**

- भारतीय-चिकित्सा संघेन आई.एम.ए. इत्यनेन पश्चिम-बंगाल-राज्यस्य आर.जी. कर मेडिकल-कॉलेज-प्रकरणे प्रधानमन्त्री-नरेन्द्र मोदि-पक्षत: स्वास्थ्य-कार्मिकाणां सुरक्षायै केन्द्रीय-विधि-विनिर्माण-प्रस्तावस्य अभ्याचना कृतास्ति।
- राष्ट्रपतिना श्रीमत्या द्रौपदी-मुर्मु-वर्यया जना: रक्षा-बन्धन- पर्वणि शुभाशिता:।
- गृहमंत्री अमितशाह: अवादीत् यत् नागरिकता-संशोधन-अधिनियम-सी.ए.ए. इत्यनेन कस्यापि धर्मस्य नागरिकस्य नागरिकताया: समापनं नैव भविष्यति, अपितु एतस्य अधिनियमस्य माध्यमेन भारतीय-शरणार्थि-जना: नागरिकताया: ससम्मानं न्यायं च प्राप्नुवन्ति।
- विदेशमंत्री सुब्रमण्यम-जयशंकर: एकदिवसीय-यात्रार्थं अद्य कुवैत नगरं सम्प्राप्रवान्।

**प्रधानमन्त्री**

भारतीय-चिकित्सा संघेन आई.एम.ए. इत्यनेन पश्चिम-बंगाल-राज्यस्य आर.जी. कर मेडिकल-कॉलेज-प्रकरणे प्रधानमन्त्री-नरेन्द्र मोदि-पक्षत: स्वास्थ्य-कार्मिकाणां सुरक्षायै केन्द्रीय-विधि-विनिर्माण-प्रस्तावस्य अभ्याचना कृतास्ति। सन्दर्भेऽस्मिन् भारतीय-चिकित्सा- संघेन-चिकित्सालयानां सुरक्षा-व्यवस्था-दृढयित्वा इत्यपि अध्यर्थितम्। श्री मोदिने लिखिते पत्रे आई.एम.ए. इत्यनेन प्रतिपादितं यत् चिकित्सालये दुष्कर्म-प्रकरणस्य च अन्वीक्षणं-कालाभ्यन्तरैव पूरयितव्या।

**गुजरात अमितशाह:**

गृहमंत्री अमितशाह: अवादीत् यत् नागरिकता-संशोधन-अधिनियम-सी.ए.ए. इत्यनेन कस्यापि धर्मस्य नागरिकस्य नागरिकताया: समापनं नैव भविष्यति, अपितु एतस्य अधिनियमस्य माध्यमेन भारतीय-शरणार्थि-जना: नागरिकताया: ससम्मानं न्यायं च प्राप्नुवन्ति। अद्य श्रीशाह: अहमदाबादनगरे अष्टाधिकअशीति: शतम् विस्थापित-जनान् नागरिकता-प्रमाणपत्रं दत्वा एकस्मिन् समारोहे सम्बोधयति स्म।

श्रीशाह: वोट-बैंक-इति विषये अपि च तुष्टिकरणस्य राजनीति-प्रकरणे कांग्रेस-दलस्य पूर्वप्रशासनानां आलोचितम्। श्रीशाहेन अशेषदेशे सी.ए.ए.-इति अधिनियमस्य मोदी प्रशासनस्य प्रतिबद्धता पुन: प्रतिपादिता। अद्य अहमदाबाद नगरे श्री अमितशाह: नगरनिगमस्य एकसहस्राधिक-कोटि-रूप्यकाणां अनेक-विकास-परियोजनानां उद्घाटनं अकरोत्।

**सीबीआई**

सी.बी.आई. इति केन्द्रीय-अन्वीक्षणाभिकरणम् कोलकाता-स्थ आर.जी. कर-इत्यस्य चिकित्सा-महाविद्यालयस्य पूर्व-प्राचार्येण सह दुरापादिते दुष्कर्म-हत्या प्रकरणे च नव-दिल्ल्यां अन्वीक्षणं विदधाति। प्रकरणेऽस्मिन् अन्वेषण-अभिकरणेन प्राचार्य सी.जी.ओ. परिसरे परिपृच्छार्थं समाहूत:। अत्रान्तरे कोलकातारक्षिबलेन आर.जी. कर-चिकित्सा-महाविद्यालयस्य, चिकित्सालयस्य पार्श्वे च अवैध-प्रकरणान् अपाकर्तुं अद्य प्रभृति आगामिषु सप्त-दिवसात्मकं यावत् भारतीय नागरिक-सुरक्षा-संहिताया: अनुच्छेद: त्रिषष्ट्यधिक-शत-163 इति स्थापित: अस्ति। कोलकातारक्षि दलेन भारतीय-विद्यार्थी-संघस्य नेतारौ अगस्त चतुर्दशे रात्रौ चिकित्सा-महाविद्यालये विहितानां हिंस्र-घटनानां प्रकरणे निगडितौ। स्वास्थ्य-कार्मिकाणां सुरक्षां सुनिश्चेतुं केन्द्र-प्रशासनं समितिरेका अपि संरचयिष्यति।

**जयशंकर:**

विदेशमंत्री सुब्रमण्यम-जयशंकर: एकदिवसीय-यात्रार्थं अद्य कुवैत नगरं सम्प्राप्रवान्। कुवैत-देशस्य विदेशमंत्री अब्दुल्ला-अली-अल-याहया-वर्य: तस्य स्वागतं अकरोत्। यात्रावधौ देशद्वयं राजनीति-व्यापार-विनिवेश-ऊर्जा-सुरक्षा-संस्कृति-जनसंपर्क-इत्यादय: विषयेषु द्विपक्षीय-सम्बंधानां विभिन्न चरणानां समीक्षा करिष्यन्ति। नेतारौ क्षेत्रीय-अन्ताराष्ट्रीय-विषयेषु अपि विचारविमर्शं करिष्यत:।

**संस्कृतवार्ताया: संस्करणमिदम् इदानीम् आकाशवाणीत: प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्या: अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**अमेरिका-विदेशमन्त्री**

अमेरिकीय-विदेशमन्त्रिणा एंटनी-ब्लिंकन-गाजा-क्षेत्र युद्धविरामस्य प्रयासा: तीव्रतरां कर्तुं अद्य इस्राइलदेशे तल-अवीवं सम्प्रस्थास्यति। गत-वर्षे अक्तूबर-मासे इस्राइल देशे हमास देशीय-आतंकि-आक्रमणानन्तरम् ब्लिंकनस्य एषा पश्चिम-एशियाया: नवमी यात्रा वर्तते। असौ काहिरायां सम्पत्स्यमाणाया: इस्रायल-हमास-अप्रत्यक्ष-शान्ति-वार्ताया: विषये ध्यानं दास्यति। एषा वार्ता शुक्रवासरे भविष्यति।

**नेपालदेश:**

नेपालदेशस्य विदेशमंत्री डॉ आरजू-राणा देउबा अद्य पञ्चदिवसीया-भारत-यात्रार्थं नवदिल्ल्यां सम्प्राप्तवती। यात्रावधौ सा विदेशमंत्री डॉ. एस.जयशंकरेण सह द्विपक्षीय-विषयेषु परिचर्चां विधास्यति। विदेश मंत्रालयेन एकस्यां विज्ञप्त्यां संसूचितम् यत् एषा यात्रा डॉ. देउबा-वर्याया: भारत-नेपाल-देशयोर्मध्ये परंपरागत-नियमित-उच्चस्तरीय-विचार-विमर्शस्य अंशो वर्तते।

विदेशमंत्रालयानुसारेण भारतदेशस्य प्रतिवेशि- प्रथम-नीत्यां नेपालदेश: प्राथमिक-सहभागि देशो वर्तते। एषा-यात्रा-देशयो: सम्बधानां सुदृढीकरणार्थं महत्त्वपूर्णा वर्तते।

## मुख्यमन्त्री मैया-सम्मान योजना

झारखण्ड-प्रदेशस्य मुख्यमन्त्रिणा हेमन्त-सोरेन-वर्येण अद्य मुख्यमन्त्री-मैया-सम्मान-योजना शुभारम्भिता। रक्षा-बन्धन-पर्वोपलक्ष्ये शुभारम्भिता एषा योजना हेमन्त वर्येण पाकुर-जनपदे प्रारब्धा। योजनाया: सन्दर्भे प्रवदन् असौ प्रोक्तवान् यत् अस्या: योजनाया: मुख्य-रूपेण महिला: लाभान्विता: भविष्यन्ति। एकविंशतित: पञ्चाशत् वर्षात्मकीया: महिला: योजनात: बहव: लाभयुता: भविष्यन्ति। मुख्यमन्त्री मैया-सम्मान-योजना अशेष-राज्यत: अष्ट-चत्वारिंशत् लक्षोत्तर-महिलानां लाभं मनसि सन्धार्य शुभारम्भिता।

## रक्षाबन्धन

राष्ट्रपतिना श्रीमत्या द्रौपदी-मुर्मु-वर्यया जना: रक्षा-बन्धन- पर्वणि शुभाशिता:। स्वीय सन्देशे राष्ट्रपतिना भणितं यत् रक्षाबन्धन-पर्व भ्रातु: भगिन्या: अपूर्व- बन्धनस्य प्रतीको वर्तते। राष्ट्रपति: प्रतिपादितवती यत् उत्सवोऽयं अनेकतायां एकताया: प्रतीको विद्यते। तया प्रोक्तं यत् उत्सवोऽयं महिलानां सुरक्षाम्प्रति तासां अधिकाराणां द्रढी करणस्य आदर्शो विद्यते।

## उत्तरप्रदेश-दुर्घटना

उत्तरप्रदेशे बुलन्दशहर-जनपदे बस-द्रुतगामि-यानेन सह संघट्टनात् दश-जना: मृता: सप्तत्रिंशच्च व्रणिता: सूच्यन्ते। दुर्घटनैषा सीलमपुर-आरक्षि-स्थात्र-पार्श्वे घटिता जाता। आहता: जना: सर्वे निकटवर्ति-चिकित्सालये उपचाराधीना: वर्तन्ते। अस्मदीय आकाशवाणी वार्ताहरेण संसूचितं यत् दुर्घटनामालक्ष्य मुख्यमन्त्रिणा योगी आदित्यनाथेन सम्बद्ध-अधिकारिभि: अन्वीक्षणाय आदिष्टा:। सर्वे मृतका: रक्षाबन्धन पर्वणि स्व-स्व परिजनानां गृहेषु गच्छन्ति स्म।

## संस्कृत-साप्ताहिकी

**प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: प्रसार्यते । भवन्त: सर्वे श्रोतुं प्रभवन्ति।**

**।। इति वार्ता:।।**